223

श्रीः ।

शिवहरराजधानीपति-

श्रीराजादेवनन्दनसिंहबहादूरनराधिप-

संगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

पञ्चमं

छिन्नमस्तातन्त्रम्

उत्करानगुरुवंश्यपण्डितश्रीरघुरान-

दुबेजीद्वारा संशोधितम् ।

तदेतत्

खेमराज श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालये

मुद्रयित्वा प्रकाशितम् ।

तृतीयावृत्तिः ।

अस्य ग्रन्थस्य पुनर्मुद्रणाधिकाराः १८६७ वार्षिक २५ तमराङ्क

नियमानुरोधेन प्रकाशकाधीनाः सन्ति ।

छिन्नमस्तातन्त्रम्

अथ छिन्नमस्ताहृदयानम्

अथ शाक्तप्रमोदः ।

छिन्नमस्तातन्त्रम् ।

अथछिन्नमस्ताध्यानम् ।

प्रत्यालीढपदांसदैवदधतीच्छिन्नंशिरः कर्त्तृकान्दिग्वस्त्रांस्वक बन्धशोणितसुधाधारांपिबन्तीम्मुदा । नागाबद्धशिरोमणिन्त्रि नयनांहृद्युत्पलालङ्कृतां रत्यासक्तमनोभवोपरिदृढान्ध्यायेज्ज वासन्निभाम् ॥ दक्षे चातिसिताविमुक्तचिकुराकर्त्रीन्तथाखप्परं हस्ताभ्यान्दधतीरजोगुणभवा नाम्नापिसावर्णिनी । देव्याश्छिन्न कवन्धत पतदसृग्धारांपिबन्तीमुदा नागाबद्धशिरोमणिर्म्मनु विदाध्येयासदासासुरैः ॥ प्रत्यालीढपदाकवन्धविगलद्रक्तम्पिव न्तीमुदा सैषायाप्रलयेसमस्तभुवनम्भोक्तुंक्षमातामसी । शक्तिः सापिपरात्पराभगवती नाम्नापराडाकिनी ध्येया ध्यानपरैः सदा सविनयं भक्तेष्टभूतिप्रदा ॥



अथयन्त्रोद्धारः ।

त्रिकोणँव्विन्यसेदादौ तन्मध्येमण्डलत्रयम्॥तन्मध्येविन्यसे द्योनिन्द्वारत्रयसमन्विताम् ॥ वहिरष्टदलम्पद्मम्भूबिम्वत्रितयम्पुनः ॥ कूर्च्चबीजँल्लिखेन्मध्ये त्रिकोणे फट्समन्वितम् ॥



अथमन्त्रोद्धारः ।

लक्ष्मीरप्रथमबीजेऽस्तिलज्जावीजेमनोभवः ॥ तृतीयेऽस्मिन्सदादेवी महापातकनाशिनी ॥ चतुर्थैतुगुणातीता मुक्तिविद्या प्रदायिका ॥ वकारेवरुणःसाक्षाज्जकारेतुसुराधिपः ॥ रेफेहुताशनोदेवोःवकारेवसुधाधिपः ॥ ऐकारेत्रिपुरादेवीरेफेत्रिपुरसुन्दरी॥ त्रैलोक्यविजयादेवी सदैवौकारसंस्थिता॥चकारेचन्द्रमा देवो नकारेहिविनायकः ॥ ईकारेकमलासाक्षाद्यकारेचसरस्वती ॥ मायायुग्मेसदादेवी प्रकृत्यासहसङ्गता ॥ वैखरीचैवफट्कारे स्वाकारेकुसुमायुधः ॥ हाकारेचरतिस्तिष्टेदेवंमन्त्रसमुच्चये ॥

अथमन्त्रः ।

श्रींह्रींक्लींऐंवज्रवैरोचनीयेहूंहूंफट्स्वाहा ॥

अथपूजाविधिः ।

प्रातरुत्थायादिकङ्कृत्वामन्त्राचमनङ्कुर्य्यात् ॥ यथा ॥ लक्ष्मी मायाकूर्च्चबीजैस्त्रिभिरुपीत्वाम्बुसाधकः ॥ वाग्भवेनोष्ठौसम्मृज्य मायाभ्यान्तुद्विरुन्मृजेत् ॥ कूर्च्चेनक्षालयेत्पाणीएभिर्म्मन्त्रैश्चवि न्यसेत् ॥ श्रीमायाकूर्च्चवाक्कामत्रिपुटाभगवर्ण्णकैः ॥ कामक लाङ्कुशाभ्याञ्चवक्त्रनासाक्षिकर्ण्णकान् ॥ नाभिहृन्मस्तकञ्चांसौ स्पृष्ट्वाशम्भुर्भवेत्क्षणात् ॥ आचम्यैवञ्छिन्नमस्तव्यँत्सरात्ताम्प्रप श्यति ॥ ततरुप्राणायामान्तँविधायषोढान्यासङ्कुर्य्यात् ॥ म न्त्रषोढान्ततरुकुर्य्यात्त्रैलोक्यवशकारिणीम् ॥ श्रीबालात्रिपु टायोनिप्रासादप्रणवैस्तथा ॥ कालीवध्वङ्कुशैः कामकलाकूर्च्चा स्त्रकैः क्रमात् ॥ षोडशीमनुवर्ण्णैश्चपृथगष्टादशाक्षरी ॥ एभिर्व्वी जैर्म्मातृकाण्णां स्वेषुस्थानेषुविन्यसेत् ॥ एषाब्रह्मस्वरूपाहि बीजषोढाप्रकीर्त्तिता ॥ अस्याः संन्यसनात्सर्व्वे वज्रदेहाभवन्ति हि ॥ सर्व्वैश्वर्य्ययुतास्तेहि जीवन्मुक्तादशाब्दतः ॥ ततःऋष्या दिन्यासः ॥ अस्यमन्त्रस्यभैरवऋषिः सम्राट्छन्दः छिन्नमस्ता देवता हूंकारद्वयंबीजं स्वाहाशक्तिरभीष्टार्थसिद्धयेविनियोगः । यथा॥ शिरसिभैरवऋषयेनमः मुखेसम्राट्छन्दसेनमः हृदिच्छिन्न मस्तादेवतायैनमः गुह्येहूंहूंवीजायनमः पादयोःस्वाहाशक्तयेन मः ॥ ततरुकराङ्गन्यासौ।ओंआंखड्गायहृदयायस्वाहाइतिकनी यस्योः। ओंईंसुखड्गायशिरसेस्वाहा इतिपवित्राङ्गुल्योः। ओंऊँसु वज्रायशिखायैस्वाहा इतिमध्यमयोः । ओंऐंपाशायकवचाय स्वाहा इतितर्ज्जन्योः । ओंऔंअङ्कुशायनेत्रत्रयायस्वाहा इत्य ङ्गुष्ठयोः।ओंअः सुरक्षारक्षासुरक्षायास्त्रायफट् इतिकरतलकरपृष्ठ योः । एवंहृदयादिषु॥तदुक्तम्भैरवतन्त्रे । उच्चेरन्पूर्व्वमाकारम्बि

न्दुलाञ्छितमस्तकम् ॥ खड्गायहृदयायेतिस्वाहायुक्तङ्गनीय सि ॥ ईकारश्चततोदेविचन्द्रकोटिसमप्रभम् ॥ सुखड्गायततोवा च्यं शिरसेतदनन्तरम् ॥ स्वाहायुक्तन्ततोवाच्यम्पवित्राङ्गुलि सयँयुतम्॥ ओंकारश्चततोवाच्यम्बिन्दुलाञ्छितमस्तकम् ॥ सुव ज्रायततोवाच्यंशिखायैतदनन्तरम् ॥ स्वाहान्तम्मध्यमायाश्च विन्यसेत्तदनन्तरम् ॥ मात्रान्द्वादशिकान्देवींव्विन्यसेच्चततः पर म् ॥ पाशायेतिसमुच्चार्य्यप्रवदेत्कवचायच ॥ स्वाहान्तँव्वि न्यसेन्मन्त्रन्तर्ज्जन्यान्तदनन्तरम् ॥ ओङ्कारश्चततोदेविचाङ्कु शन्तदनन्तरम् ॥ नेत्रत्रयायस्वाहान्तमङ्गुष्ठेकरयोर्द्वयोः ॥ अ कारश्चविसर्ग्गान्तं सुरक्षारक्षसयँयुतम् ॥ अःसुरक्षायसयँयुक्तम स्त्रयेतिततः परम् ॥ षडक्षरसमायुक्ताँव्विन्यसेत्करयोर्द्वयोः ॥ हृदिमूर्ध्निशिखायाश्च कवचेनेत्रमण्डले ॥ यावदस्त्रञ्चतुर्दिक्षुवि दिक्षुचयथाक्रमम् ॥ त्रिशक्तिन्त्रैभैरववाक्यम् ॥ उच्चरेत्प्र णवम्पूर्व्वमाकारम्बिन्दुसयँयुतम् ॥ इत्यादिवाक्यात् कराङ्गेषुप्र णवसंवलितोन्यासः ॥ ततोमूलेनमस्तकादिपादपर्य्यन्तम्पा दादिमस्तकपर्य्यन्तव्वारत्रयन्यसेत् ॥ ततोध्यानम् ॥ स्वनाभौ नीरजन्ध्यायेदर्द्धेन्दुकसितंसितम् ॥ तत्पद्मकोशमध्येतु मण्डल ञ्चण्डरोचिषः ॥ जपाकुसुमसङ्काशं रक्तवन्धूकसन्निभम् ॥ रजःस त्त्वतमोरेखायोनिमण्डलमण्डितम् ॥ मध्येतुताम्महादेवींसूर्य्यको टिसमप्रभाम् ॥ छिन्नमस्ताङ्करेवामे धारयन्तींस्वमस्तकम् ॥ प्रसारितमुखीन्देवीँल्लेलिहानाग्रजिह्विकाम् ॥ पिबन्तींरौधिरी न्धारान्निजकण्ठविनिर्ग्गताम् ॥ विकीर्ण्णकेशपाशाञ्च नानापु ष्पसमन्विताम् ॥ दक्षिणेचकरेकर्त्रीम्मुण्डमालाविभूषिताम् ॥ दिगम्बराम्महाघोराम्प्रत्यालीढपदेस्थिताम् ॥ अस्थिमालाधरा न्देवीन्नागयज्ञोपवीतिनीम्॥ रतिकामोपरिष्ठाञ्चसदाध्यायन्तिम

न्त्रिणः॥ सदाषोडशवर्षीयाम्पीनोन्नतपयोधराम्॥ विपरीतरता सक्तौ ध्यायेद्रतिमनोभवौ॥ डाकिनीवर्णिनीयुक्तव्वामदक्षिणयो गतः॥ देवीगलोच्छलद्रक्तधारापानम्प्रकुर्व्वतीम्॥ वर्णिनीह्लो हितांसौम्याम्मुक्तकेशीन्दिगम्बराम्॥ कपालकर्तृकाहस्ताव्वा मदक्षिणयोगतः॥ नागयज्ञोपवीताढचाज्वलत्तेजोमयीमिव॥ प्रत्यालीढपदाँव्विद्यान्नानालङ्कारभूषिताम्॥ सदाद्वादशवर्षी यामस्थिमालाविभूषिताम्॥ डाकिनीव्वामपार्श्वेतु कल्पसू र्य्यानलोपमाम्॥ विद्युज्जटान्त्रिनयनान्दन्तपङ्क्तिवलाकिनीम्॥ दंष्ट्राकरालवदनाम्पीनोन्नतपयोधराम्॥ महादेवीम्महाघोराम्मुक्त केशीन्दिगम्बराम्॥लेलिहानमहाजिह्वाम्मुण्डमालाविभूषिताम्॥ कपालकर्त्तृकाहस्ताव्वामदक्षिणयोगतः॥ देवीङ्गलोच्छलद्रक्तधा रापानम्प्रकुर्व्वतीम्॥ करस्थितकपालेन भीषणेनातिभीषणाम्॥ आभ्यान्निषेवमाणान्तान्ध्यायेद्देवींव्विचक्षणः॥ ध्यानस्यावश्यक त्वमाहतन्त्रे। प्रचण्डचण्डिकामेवमध्यात्वायस्तुपूजयेत्॥ स व्यस्तस्याशिरश्छित्त्वादेवीपिबतिशोणितम्॥ पिवतितेनमुखेने तिशेषः। तथाच। स्वमस्तकंसखर्ष्परंरक्तधाराभिपूरितम्॥ ल लज्जिह्वम्महाभीमन्धृतव्वामभुजेतथा॥ इतिभैरवतन्त्रे। तत्रैव। सितङ्कुर्य्याद्दलम्पूर्व्वमाग्नेयंरक्तवर्णकम्॥ याम्यङ्कृष्णमतःपीतं शुक्लंरक्तंसितासितम्॥ ततःपीताम्प्रकुर्व्वीतकर्णिकान्तस्यम ध्यगाम्॥ तन्मध्येतुप्रकुर्व्वीत मण्डलञ्चण्डरोचिषः॥ रजःस त्त्वतमोरेखा रक्ताशुक्लासिताक्रमात्॥मायायुग्मन्ततोन्यस्य षड क्षरसमन्वितम्॥ बाह्यन्तस्यचचक्रस्यकुर्य्यात्प्राकारवेष्टितम्॥ पूर्व्वंरक्तन्ततःकृष्णं सितम्पीतंयथाक्रमम्॥ चतुर्द्वारसमायुक्त ङ्क्षेत्रपालैरधिष्ठितम्॥ इत्यस्याःपूजायन्त्रम्॥ यथावा॥त्रिकोणँ व्विन्यसेदादौ तन्मध्येमण्डलत्रयम्॥तन्मध्येविन्यसेद्योनिन्द्वार

त्रयसमन्विताम् ॥ बहिरष्टदलम्पद्मम्भूबिम्बत्रितयम्पुनः॥कूर्च्चबीं जँल्लिखेन्मध्येत्रिकोणेफट्समन्वितम् ॥ यद्वाएतद्धचानोक्तय्यँन्त्र म् । तथाच । अपरञ्चप्रवक्ष्यामिशृणुदेवियथाक्रमम् ॥ स्वना भौनीरजंध्यायेद्भानुमण्डलसन्निभम् ॥ योनिचक्रसमायुक्तङ्गुण त्रितयसंज्ञितम् ॥ तत्रमध्येमहादेवीञ्छिन्नमस्तांस्मरेद्यतिः ॥ प्रदीपकलिकाकारामद्वितीयव्यवस्थिताम् ॥ योनिमुद्रासमा युक्तांहृदयस्थितलोचनाम् ॥ ध्येयमेतद्यतीनाञ्च गृहस्थानान्नि शामय ॥ यथा । अन्तरेस्वशरीरस्यनाभिनीरजसङ्गताम् ॥ निर्ल्लेपान्निर्गुणांसूक्ष्माम्बालचन्द्रसमप्रभाम् ॥ समाधिमात्रग म्यातुगुणत्रितयवेष्टिताम् ॥ कलातीताङ्गुणातीतान्मुक्तिमात्र प्रदायिनीम्॥ एवन्ध्यात्वामानसैःसम्पूज्यतारिणीवच्छङ्खस्था पनङ्कुर्य्यात् ॥ ततश्पीठपूजा ॥ आधारशक्तयेनमःप्रकृतयेनमः कूर्म्मा०अनन्ताय०पृथिव्यै० क्षीरसमुद्राय० रत्नद्वीपाय० कल्प वृक्षाय० । तदधःस्वर्णसिंहासनाय०आनन्दकन्दाय०सम्बिल्व लाय०सर्व्वतत्त्वात्मकपद्माय०संसत्त्वाय०रंरजसे०तंतमसे० आँ आत्मने० अंअन्तरात्मने० पंपरमात्मने० ह्रींज्ञानात्मनेनमः । पद्ममध्येरतिकामार्त्ता । भरवमतेतु ।आधारशक्तिङ्कूर्म्मन्तुनागरा जमतश्परम् ॥ पद्मनालञ्च पद्मञ्चपूजयेन्मन्त्रविन्नरः॥मण्डलञ्च तुरस्रन्तु रजस्सत्त्वन्तमस्तथा ॥ रतिकामौचसम्पूज्यशक्तिपूजांस माचरेत् ॥ रतिकामोपरिवज्रवैरोचनीयेदेहि २ एहि २ गृह्ण २ म ममसिद्धिन्देहि २ ममशत्रून् मारय २ करालिकेहूँफट्स्वाहा इति पीठमन्त्रस्सर्वत्रप्रणवादिनमोन्तेनपूजयेत् ॥ पुनर्ध्यात्वावाहयेत् सर्व्वसिद्धिवर्ण्णनीयेसर्व्वसिद्धिडाकिनीये वज्रवैरोचनीयेइहावह आवह ॥ पुनस्तन्मन्त्रमुच्चार्य्य इहतिष्ट २ इहसन्निधेहि इह सन्निरुध्यस्वइत्यनेनावाह्य ओंआँह्रींक्रोंहंसःइत्यनेनप्राणप्रति

ष्टांकृत्वा। ओंआंषडङ्गायहृदयायस्वाहा ॥ इत्यादिनाषडङ्गँव्विन्यस्ययथाशक्तिपूजाङ्कृत्वावलिन्दद्यात्। तथा। वज्रवैरोचनीयेदेहि२ एहि २ गृह्ण२ वलिम्ममसिद्धिन्देहि२ममशत्रून्मारयमारय करालिके हूँफट्स्वाहा ॥ इतिमन्त्रेणततोदेव्यादक्षिणे ओंवर्ण्णिन्यैनमः वामेओंडाकिन्यै० ॥ ततोदेव्यङ्गेषडङ्गंसम्पूज्यदक्षिणे ओंशङ्खनिधयेनमः वामेओंपद्मनिधयेनमःपूर्व्वादिदिक्षुलक्ष्मींलज्जाम्मायाव्वाँणीञ्चपूजयेत्। विदिक्षुब्रह्मविष्णुरुद्रेश्वरान् मध्येसदाशिवंसर्वत्रप्रणवादिनमोन्तेनपूजयेत्।ततः पञ्चपुष्पाञ्जलीन्दत्वा आवरणान्पूजयेत् ॥ अग्नीशासुरवायुषु मध्येदिक्षुच ओं आँखड्गायहृदयायस्वाहाइत्यादिनाषडङ्गानिसम्पूज्य अष्टपत्रेषुपूर्वादिक्रमेण ओंह्रींकाल्यैनमःएवंवर्णिन्यै०डाकिन्यै०भैरव्यै० महाभैरव्यै० इन्द्राक्ष्यै० पिङ्गाक्ष्यै०संहारिण्यै०।सर्व्वत्रप्रणवादिनमोन्तेनपूजयेत्। यथा एकान्नामाभिधाङ्कालीव्वँर्णिनीण्डाकिनीन्तथा ॥ भैरवीञ्चमहापूर्वाम्भैरवीन्तदनन्तरम् ॥ इन्द्राक्षीञ्चसपिङ्गाक्षीन्ततःसंहारकारिणीम् ॥ पूर्वादिकेदलेपूज्याःशक्तयश्चयथाक्रमम् ॥ प्रणवादिनमोन्तेनलज्जाबीजं समुच्चरन् ॥ पद्ममध्येहूँहूँफट्नमःस्वाहानमः देव्यादक्षिणेसम्राट्छन्दसेनमः देव्याउत्तरेसर्व्ववर्ण्णेभ्योनमः पुनर्दक्षिणे ओंबीजशक्तिभ्यान्नमः। पद्माग्रेषुपूर्व्वादिक्रमेण ब्राह्म्यै० माहेश्वर्य्यै० वैष्णव्यै०वाराह्यै० इन्द्राण्यै० चामुण्डायै० महालक्ष्म्यै० । सर्वत्रप्रणवादिनमोन्तेन पूजयेत् ततश्चतुर्द्दिक्षुद्वारेषु ओंकरालायनमःविकरालायनमःएवम्अतिकरालाय० महाकरालाय०॥ यथाभैरवीये। पूर्वद्वारेकरालश्चविकरालश्चदक्षिणे ॥ पश्चिमेऽतिकरालश्चमहाकरालमुत्तरे ॥ ततोधूपादिविसर्ज्जनान्तङ्कर्म्मसमापयेत् । विसर्ज्जनेत्वयँव्विशेषः । संहारमुद्राम्प्रदर्श्य अञ्जलावारोप्यवामनासापुटेन । योनिमुद्रास

मारूढाम्प्रदीपकलिकोज्ज्वलाम् ॥ कृष्णपक्षेविधुमिवक्रमेणक्षी णताङ्गताम् ॥ इमम्मन्त्रंसमुच्चार्य्यचण्डरश्मिन्निवेशयेत् ॥ उत्त रेशिखरेइत्यादि । अस्यपुरश्चरणंलक्षजपःसिद्धविद्यात्वात् । ब लिदानेतुभैरवीये । रात्रौबलिꣳप्रदातव्योमत्स्यमांससुरादिभिः॥ अथवामधुपानाद्यैर्म्मधुरैर्व्विभवक्रमैः ॥ मन्त्रस्तु । उच्चरेत्प्रणवम्पू र्वंसर्वसिद्धिप्रदेऽन्वितम् ॥ वर्ण्णिनीयेततोवाच्यं सर्व्वसिद्धिप्रदेत तः ॥ डाकिनीयेततोवाच्यन्देवीनामतत ꣳपरम् ॥ एह्येहीतितितो वाच्यमिमम्बलिमनन्तरम् ॥ गृह्णगृह्णतत ꣳप्रोक्त्वामममसिद्धिमन न्तरम् ॥ देहिदेहीतिमायाचतत ꣳफट्स्वाहयायुतः ॥ बलिम न्त्रःसमाख्यात ꣳपजितोऽयंसुरेश्वरि ॥ इतिपूजा ॥

अथस्तोत्रम् ।

ईश्वरउवाच॥स्तवराजमहव्वँन्देवैरोचन्याःशुभप्रदम् ॥ नाभौ शुभ्रारविन्दन्तदुपरिविलसन्मण्डलञ्चण्डरश्मेः संसारस्यैकसारा न्त्रिभुवनजननीन्धर्म्मकामार्त्थदात्रीम्। तस्मिन्मध्येत्रिभागेत्रित यतनुधराञ्छिन्नमस्ताम्प्रशस्तान्ताव्वँन्देछिन्नमस्तां शमनभयह राय्यँोगिनीय्यँोगमुद्राम्॥१॥नाभौशुद्धसरोजवक्त्रविलसद्धन्धूकपु ष्पारुणम्भास्वद्भास्करमण्डलन्तदुदरे तद्योनिचक्रम्महत् ॥तन्म ध्येविपरीतमैथुनरतप्रद्युम्नसत्कामिनीपृष्ठस्थान्तरुणार्ककोटिवि लसत्तेजःस्वरूपाम्भजे॥ २ ॥ वामेछिन्नशिरोधरान्तदितरे पाणौ महत्कर्त्तृकाम्प्रत्यालीढपदान्दिगन्तवसनामुन्मुक्तकेशव्रजाम् ॥ छिन्नात्मीयशिरस्समुच्छलदमृग्धाराम्पिबन्तीम्पराम्बालादित्य समप्रकाशविलसन्नेत्रत्रयोद्भासिनीम् ॥ ३ ॥ वामादन्यत्रनालम्ब हुगहनगलद्रक्तधाराभिरुच्चैर्गायन्तीमस्थिभूषाङ्करकमललसत्क र्त्तृकामुग्ररूपाम्॥रक्तामारक्तकेशीमपगतवसनाव्वँर्ण्णिनीमात्मश

क्तिम्प्रत्यालीढोरुपादामरुणितनयनाँय्योगिनीँय्योगनिद्राम्४॥ दिग्वस्त्राम्मुक्तकेशीम्प्रलयघनघटाघोररूपाम्प्रचण्डान्दंष्ट्रादु×प्रेक्ष्यवक्त्रोदरविवरलसल्लोलजिह्वाग्रभासाम् ॥ विद्युल्लोलाक्षियुग्मां हृदयतटलसद्भोगिनीम्भीममूर्त्तिं सद्यश्छिन्नात्मकण्ठप्रगलितरुधिरैर्ड्डाकिनीव्वँर्द्धयन्तीम् ॥ ५ ॥ ब्रह्मेशानाच्युताद्यैःशिरसिविनिहितामन्दपादारविन्दैरातैर्योगीन्द्रमुख्यै × प्रतिपदमनिशञ्चिन्तिताञ्चिन्त्यरूपाम् ॥ संसारेसारभूतान्त्रिभुवनजननीञ्छिन्नमस्ताम्प्रशस्तामिष्टान्तामिष्टदात्रीङ्कलिकलुषहराञ्चेतसा चिन्तयामि ॥ ६ ॥ उत्पत्तिस्थितिसंहृतीर्घटयितुन्धत्तेत्रिरूपान्तनुन्त्रैगुण्याज्जगतोयदीयविकृतिर्ब्रह्माच्युतः शूलभृत् ॥ तामाद्याम्प्रकृतिंस्मरामिमनसासर्व्वार्त्थसंसिद्धये यस्याःस्मेरपदारविन्दयुगले लाभम्भजन्तेनराः ॥ ७ ॥ अभिलषितपरस्त्रीयोगपूजापरोऽहम्बहुविधजनभावारम्भसम्भावितोऽहम् ॥ पशुजनविरतोऽहम्भैरवीसंस्थितोऽहङ्गुरुचरणपरोऽहम्भैरवोऽहं शिवोऽहम्॥ ८॥ इदंस्तोत्रम्महापुण्यम्ब्रह्मणाभाषितम्पुरा ॥ सर्व्वसिद्धिप्रदंसाक्षान्महापातकनाशनम् ॥९॥ य×पठेत्प्रातरुत्थाय देव्यास्सन्निहितोऽपिवा ॥ तस्यसिद्धिर्भवेद्देवि वाञ्छितार्त्थप्रदायिनी ॥१०॥ धनन्धान्यंसुतञ्जायां हयंहस्तिनमेवच ॥ वसुन्धरान्महाविद्यामष्टसिद्धिर्ल्लँभेद्ध्रुवम् ॥ ११ ॥ वैयाघ्राजिनरञ्जितस्वजघनेऽरण्येप्रलम्बोदरे खव्वऽनिर्व्वचनीयपर्व्वसुभगे मुण्डावलीमण्डिते ॥ कर्त्रीङ्कन्दरुचिँव्विचित्रवनिताञ्ज्ञानेदधानेपदेमातर्भक्तजनानुकम्पिनिमहामायेऽस्तुतुभ्यन्नमः ॥ १२ ॥ इति छिन्नमस्तास्तोत्रंसमाप्तम् ॥ छ ॥

अथकवचम् ।

श्रीदेव्युवाच ॥ कथिताश्छिन्नमस्तायायाविद्यास्सुगोपिताः ॥त्वयानाथेनजीवेशश्रुताश्चाधिगतामया॥१॥इदानींश्रोतुमिच्छामिकवचंपूर्व्वसूचितम् ॥ त्रैलोक्यविजयन्नाम कवचङ्कथ्यताम्प्रभो ॥ २ ॥ भैरवउवाच ॥ शृणुवक्ष्यामिदेवीशिसर्व्वदेवनमस्कृते ॥ त्रैलोक्यविजयन्नाम कवचंसर्वमोहनम् ॥३॥ सर्व्वविद्यामयंसाक्षात्सुरासुरजयप्रदम् ॥ धारणात्पठनादीशस्त्रैलोक्यविजयीविभुः ॥ ४ ॥ ब्रह्मानारायणोरुद्रोधारणात्पठनाद्यतः ॥ कर्त्तापाताचसंहर्त्ताभुवनानांसुरेश्वरि ॥ ५ ॥ नदेयंपरशिष्येभ्यअभक्तेभ्योविशेषतः ॥ देयंशिष्याय भक्ताय प्राणेभ्योऽप्यधिकायच ॥ ६ ॥ देव्याश्चच्छिन्नमस्तायाश्कवचस्यचभैरवः ॥ ऋषिर्विराट्चच्छन्दश्चदेवताछिन्नमस्तका ॥ ७ ॥ त्रैलोक्यविजयेमुक्तौ विनियोगश्प्रकीर्त्तितः ॥ ओंहूँकारोमेशिरश्पातुच्छिन्नमस्ता बलप्रदा ॥ ८ ॥ ह्रींह्रींऐंव्यक्षरीपातु भालवक्त्रदिगम्बरी ॥ श्रीं ह्रींहूँऐंदृशौपातुमुण्डङ्कर्त्तृधरापिसा ॥ ९ ॥ साविद्याप्रणवाद्यन्ता श्रुतियुग्मंसदाऽवतु ॥ वज्रवैरोचनीयेहूँफट्स्वाहाचश्रुवादिकम् ॥ १० ॥ घ्राणम्पातुच्छिन्नमस्ता मुण्डकर्त्तृविधारिणी ॥ श्रीमायाकूर्च्चवाग्बीजैर्वज्रवैरोचनीये हूं ॥ ११ ॥ हूंफट्स्वाहामहाविद्यापोडशीब्रह्मरूपिणी ॥ स्वपाश्श्वैबालिकाचासृग्धाराम्पायतीमुदा ॥ १२ ॥ वदनंसर्व्वदापातु च्छिन्नमस्तास्वशक्तिका ॥ मुण्डकर्त्तृधरारक्ता साधकाभीष्टदायिनी॥१३ ॥ वर्णिनीडाकिनीयुक्तासापिमामभितोऽवतु ॥ रामाद्यापातुजिह्वाञ्चलज्जाद्यापातुकण्ठकम् ॥ १४ ॥ कूर्च्चाद्याहृदयम्पातु वागाद्यास्तनयुग्मकम् ॥ रमयापुटिताविद्या पार्श्वौपातुसुरेश्वरी ॥ १५ ॥

मायया पुटिताविद्या नाभिदेशन्दिगम्बरी ॥ कूर्च्चेनपुटितादेवी पृष्ठदेशंसदावतु॥१६॥वाग्बीजपुटितातेषाम्मध्यम्पातुसशक्तिका ॥ ईश्वरीकूर्च्चवाग्बीजेवज्रवैरोचनीयेहूं ॥ १७ ॥ हूंफट्स्वाहा महाविद्यासूर्य्यकोटिसमप्रभा ॥ छिन्नमस्तासदापायादूरुयुग्मं सशक्तिका ॥ १८ ॥ ह्रींहूंवर्णिनीजानूश्रीं ह्रंह्रींहूंचडाकिनीपदम्॥ सर्व्वविद्यास्थितानित्या सर्व्वाङ्गम्मेसदावतु ॥१९॥ प्राच्याम्पायादेकलिङ्गायोगिनीपावकेवतु॥ डाकिनीदक्षिणेपातुश्रीमहाभैरवीचमाम् ॥ २० ॥ नैर्ऋत्यांसततम्पातुभैरवीपश्चिमेऽवतु ॥ इन्द्राणीपातुवायव्येऽसिताङ्गीपातुचोत्तरे ॥२१॥ संहारिणीसदापातुशिवकोणेसकर्तृका ॥ इत्यष्टशक्तयः पान्तु दिग्विदिक्षुसकर्तृकाः ॥२२॥क्रींक्रींक्रींसापातुपूर्व्वेहूंहूंमाम्पातुपावके॥ह्रींह्रींमान्दक्षिणेपातु दक्षिणेकालिकाऽवतु॥२३॥क्रींक्रींक्रींचैवनैर्ऋत्यांह्रींह्रींमाम्पश्चिमेऽवतु ॥ ह्रींह्रींपातुमरुत्कोणेस्वाहापातुसदोत्तरे॥२४॥ महाकालीखड्गहस्ताशिवकोणेसदाऽवतु ॥ तारामायावधूःकूर्च्चेफट्कारोमांमहामनुः ॥ २५ ॥ खड्गकर्तृधरातारा चोर्द्ध्वदेशंसदावतु ॥ ह्रींह्रींहूंफट्चपातालेमांपातुचैकजटासती ॥२६॥ तारातुसहिताखेऽव्यान्महानीलसरस्वती ॥ इतितेकथितन्देव्याः कवचम्मन्त्रविग्रहम् ॥ २७ ॥ यद्धृत्वापठनाद्धीमः क्रोधाख्योभैरवप्रभुः॥सुरासुरमुनीन्द्राणाङ्कर्त्ताहर्त्ताभवेत्स्वयम् ॥२८॥ यस्याज्ञयामधुमतीयातिसासाधकालयम् ॥ भूतिन्याद्याश्चयोगिन्योयक्षिण्याद्याश्चखेचराः॥ २९ ॥ आज्ञांगृह्णन्तितास्तस्य कवचस्यप्रसादतः ॥ एतद्देवपरम्ब्रह्मकवचम्मन्मुखोदितम् ॥ ३० ॥ देवीमभ्यर्च्यगन्धाद्यैर्म्मूलेनैवपठेत्सकृत् ॥ सवँत्सरकृतायाश्च पूजायाः फलमाप्नुयात् ॥ ३१ ॥ भूर्जेविलिखितञ्चैवगुटिकाङ्कण्ठनीस्थिताम् ॥ धारयेद्दक्षिणेबाहौकण्ठेवायदिवान्यतः ॥३२॥ सर्व्वै

श्वर्य्ययुतोभूत्वात्रैलोक्यवँ्वशमानयेत्॥ तस्यगेहेवसेल्लक्ष्मीर्वाणी चवदनाश्रमे ॥ ३३ ॥ ब्रह्मास्त्रादीनिशस्त्राणितद्वात्रेयान्तिसौम्यताम् ॥ इदङ्कवचमज्ञात्वा योभजेच्छिन्नमस्तकाम् ॥ सोऽपिशस्त्रप्रहारेणमृत्युमाप्नोतिसत्वरम्॥३४॥ इतिश्रीभैरवतन्त्रे भैरवीभैरवसँ्वादेत्रैलोक्यविजयन्नाम छिन्नमस्ताकवचंसमाप्तम्॥

अथ हृदयम् ।

श्रीपार्व्वत्युवाच ॥ श्रुतम्पूजादिकंसम्यग्भवद्भक्ताब्जानिस्सृतम् हृदयञ्छिन्नमस्तायाश्श्रोतुमिच्छामिसाम्प्रतम् ॥ श्रीमहादेव उवाच ॥ नाद्यावधिमयाप्रोक्तङ्कस्यापिप्राणवल्लभे ॥ यत्त्वया परिपृष्टोहव्वँक्ष्येप्रीत्यैतवप्रिये॥ ओमस्यश्रीछिन्नमस्ताहृदयस्तोत्रमन्त्रस्यभैरवऋषिस्सम्राट्छन्दश्छिन्नमस्तादेवता ह्रूंबीजम् ओं शक्तिः ह्रींकीलकम् शत्रुक्षयकरणार्त्थेपाठेविनियोगः ॥ ओंहृदयायनमःओंह्रूंशिरसेस्वाहा ओं ह्रींशिखायैवषट् ओंक्लींनेत्रत्रयायवौषट् ओंऐंकवचायहुम् ओंह्रूंअस्त्रायफट् ॥ एवङ्करन्यासः ॥ अथध्यानम्॥रक्ताभांरक्तकेशीङ्करकमललसत्कर्तृकांकालकान्तिँ्विच्छिन्नात्मीयमुण्डासृगरुणबहुलादग्रधाराम्पिबन्तीम् ॥ विद्याओघप्रचण्डश्वसनसमनिभां सेवितांसिद्धसङ्घैःपद्माक्षीञ्छिन्नमस्ताञ्छलकरदितिजच्छेदिनींसंस्मरामि ॥ १ ॥ वन्देऽहञ्छिन्नमस्तान्ताञ्छिन्नमुण्डधराम्पराम् ॥ छिन्नग्रीवोच्छटाच्छन्नां क्षौमवस्त्रपरिच्छदाम् ॥ १ ॥ सर्व्वदासुरसङ्घेन सेविताङ्घ्रिसरोरुहाम् ॥ सेवेसकलसम्पत्त्यैछिन्नमस्तां शुभप्रदाम् ॥ २ ॥ यज्ञानाय्यैगयज्ञाय यातुजातायुगेयुगे॥दानवान्तकरीदेवी छिन्नमस्ताम्भजामिताम् ॥ ३ ॥ वैरोचनीव्वँरारोहां वामदेवविवर्द्धिताम् ॥ कोटिसूर्य्यप्रभाव्वँन्दे विद्युद्वर्ण्णाक्षिमण्डिताम् ॥ ४ ॥

निजकण्ठोच्छलद्रक्तधारयायामुहुर्म्मुहुः ॥ योगिनीस्तर्पयन्त्युग्रातस्याश्चरणमाश्रये ॥ ५ ॥ हूमित्येकाक्षरंमन्त्रं यदीयय्युक्तमानसः ॥ योजपेत्तस्यविद्वेषी भस्मताय्यातिताम्भजे ॥ ६ ॥ हूं स्वाहेतिमनुंसम्यग्यःस्मरत्यार्त्तिमान्नरः ॥ छिनत्तिच्छिन्नमस्तायातस्यबाधांनमामिताम् ॥ ७ ॥ यस्याःकटाक्षमात्रेणक्रूरभूतादयाद्रुतम् ॥ दूरतस्सम्पलायन्ते छिन्नमस्तांभजामिताम् ॥ ८ ॥ क्षितितलपरिरक्षा क्षान्तरोषासुदक्षा छलयुतखलकक्षाछेदने क्षांतिलक्ष्या ॥ क्षितिदितिजसुपक्षा क्षोणिपाक्षय्यशिक्षा जयतुजयतुचाक्षाछिन्नमस्तारिभक्षा ॥ ९ ॥ कलिकलुषकलानां कर्त्तनेकर्त्तृहस्ता सुरकुवलयकाशा मन्दभानुप्रकाशा ॥ असुरकुलकलापत्रासिकाकालमूर्त्तिर्जयतुजयतुकाली छिन्नमस्ताकराली ॥ १० ॥ भुवनभरणभूरिभ्राजमानानुभावा भव भवविभवानां भारणोद्भातभूतिः ॥ द्विजकुलकमलानां भासिनी भानुमूर्त्तिर्भवतुभवतुवाणीच्छिन्नमस्ताभवानी ॥ ११॥ममरिपुगणमाशुच्छेत्तुमुग्रङ्कृपाणं सपदिजननितीक्ष्णञ्छिन्नमुण्डङ्कृहाण॥ भवतुतवयशोलञ्छिन्धिशत्रून्खलान्मे ममचपरिदिशेष्टं छिन्नमस्तेक्षमस्व ॥ १२ ॥ छिन्नग्रीवाछिन्नमस्ता छिन्नमुण्डधराक्षता ॥ क्षोदक्षेमकरीस्वक्षा क्षोणीशाच्छादनक्षमा ॥ १३ ॥ वैरोचनीवरारोहावलिदानप्रहर्षिता ॥ बलिपूजितपादाब्जावासुदेवप्रपूजिता ॥ १४ ॥ इतिद्वादशनामानि छिन्नमस्ताप्रियाणियः ॥ स्मरेत्प्रातस्समुत्थाय तस्यनश्यन्तिशत्रवः ॥ १५ ॥ यांस्मृत्वासन्तिसद्यस्सकलसुरगणास्सर्व्वदासम्पदाढ्याः शत्रूणांसङ्घमाहत्यविशदवदनास्स्वस्थचित्ताश्रयन्ति ॥ तस्यास्सङ्कल्पवन्तस्सरसिजचरणंसन्ततंसंश्रयन्ति साद्याश्रीशादिसेव्यासुफलतुसुतरांछिन्नमस्ताप्रशस्ता ॥ १६ ॥ हृदयमिदम

ज्ञात्वाहन्तुमिच्छतियोद्विषम् ॥ कथंतस्याचिरंशत्रुर्न्नाशमेष्य तिपार्व्वति ॥ १७ ॥ यदीच्छेन्नाशनंशत्रोश्शीघ्रमेतत्पठेन्नरः ॥ छिन्नमस्ताप्रसन्नापि ददातिफलमीप्सितम् ॥ १८ ॥ शत्रुप्रश मनंपुण्यं समीप्सितफलप्रदम् ॥ आयुरारोग्यदञ्चैव पठतांपु ण्यसाधनम् ॥ १९ ॥ इतिश्रीनन्द्यावर्त्ते महादेवपार्व्वतीसंवादे श्रीछिन्नमस्ताहृदयस्तोत्रंसम्पूर्णम् ॥

अथाष्टोत्तरशतनाम ।

श्रीपार्व्वत्युवाच ॥ नाम्नांसहस्रंपरमं छिन्नमस्ताप्रियंशुभम् ॥ कथितम्भवताशम्भोसद्यश्शत्रुनिकृन्तनम् ॥ १ ॥ पुनश्च पृ च्छाम्यहन्देवकृपाङ्कुरुममोपरि ॥ सहस्रनामपाठेचअशक्तोय श पुमान्भवेत् ॥ २ ॥ तेनकिम्पक्यतेनाथतन्मेब्रूहिकृपामय ॥ श्रीसदाशिवउवाच ॥ अष्टोत्तरशतन्नाम्नाम्पक्यतेतेनसर्व्वदा ॥ ॥ ३ ॥ सहस्रनामपाठस्यफलम्प्राप्नोतिनिश्चितम् ॥ ॐमस्यश्री छिन्नमस्ताष्टोत्तरशतनामस्तोत्रस्यसदाशिवऋषिरनुष्टुप्छन्दः ॥ श्रीछिन्नमस्तादेवताममसकलसिद्धिप्राप्तयेजपेविनियोगः ॥ ॐ छिन्नमस्तामहाविद्यामहाभीमामहोदरी ॥ चण्डेश्वरीचण्डमा ताचण्डमुण्डप्रभञ्जिनी ॥ ४ ॥ महाचण्डाचण्डरूपाचण्डिका चण्डखण्डिनी॥क्रोधिनीक्रोधजननीक्रोधरूपाकुहूश्कला ॥ ५॥ कोपातुराकोपयुताकोपसंहारकारिणी ॥ वज्रवैरोचनीवज्रावज्रक ल्पाचडाकिनी ॥६॥ डाकिनीकर्म्मनिरताडाकिनीकर्म्मपूजिता॥ डाकिनीसङ्गनिरताडाकिनीप्रेमपूरिता ॥ ७ ॥ खट्वाङ्गधा रिणीखर्व्वाखड्गखर्प्परधारिणी ॥ प्रेताशनाप्रेतयुताप्रेतसङ्गविहा रिणी ॥ ८ ॥ छिन्नमुण्डधराछिन्नचण्डविद्याचचित्रिणी ॥८॥घोर रूपाघोरदृष्टिर्घोररावाघनोदरी ॥ ९ ॥ योगिनीयोगनिरताजप

यज्ञपरायणा॥योनिचक्रमयीयोनिर्य्योनिचक्रप्रवर्त्तिनी ॥ १० ॥ योनिमुद्रायोनिगम्यायोनियन्त्रनिवासिनी॥ यन्त्ररूपायन्त्रमयी यन्त्रेशीयन्त्रपूजिता ॥ ११ ॥ कीर्त्याकपर्द्दिनीकालीक ङ्कालीकलविकारिणी ॥ आरक्तारक्तनयनारक्तपानपरायणा ॥ ॥ १२ ॥ भवानीभूतिदाभूतिर्भूतिदात्रीचभैरवी ॥ भैरवा चारनिरताभूतभैरवसेविता ॥ १३ ॥ भीमाभीमेश्वरीदेवीभीम नादपरायणा ॥ भवाराध्याभवनुता भवसागरतारिणी ॥ १४ ॥ भद्रकालीभद्रतनुर्भद्ररूपाचभद्रिका ॥ भद्ररूपामहाभद्रासुभद्रा भद्रपालिनी ॥ १५ ॥ सुभव्याभव्यवदनासुमुखीसिद्धसेविता ॥ सिद्धिदासिद्धिनिवहा सिद्धासिद्धनिषेविता ॥ १६ ॥ शुभदाशुभ भगाशुद्धा शुद्धसत्त्वाशुभावहा ॥ श्रेष्टादृष्टिमयीदेवी दृष्टिसंहार कारिणी॥१७॥शर्व्वाणीसर्व्वगासर्व्वा सर्व्वमङ्गलकारिणी॥ शिवा शान्ताशान्तिरूपामृडानी मदनातुरा ॥ १८ ॥ इतितेकथितन्दे विस्तोत्रम्परमदुर्ल्लभम् ॥ गुह्याद्गुह्यतरङ्कोप्यङ्गोपनीयम्प्रयत्नतः ॥ १९ ॥ किमत्रबहुनोक्तेन त्वदग्रेप्राणवल्लभे ॥ मारणम्मोहन न्देविद्युच्चाटनमतःपरम् ॥ २० ॥ स्तम्भनादिककर्म्माणिऋद्ध यस्सिद्धयोऽपिच॥ त्रिकालपठनादस्यसर्व्वेसिद्धचन्त्यसंशयः ॥ ॥ २१ ॥ महोत्तमंस्तोत्रमिदँव्वरानने मयेरितन्नित्यमनन्यबुद्ध यः ॥ पठन्तियेभक्तियुतानरोत्तमा भवेन्नतेषांरिपुभिः पराजयः ॥ ॥ २२ ॥ इतिश्रीछिन्नमस्ताष्टोत्तरशतनामस्तोत्रंसमाप्तम् ॥

अथसहस्रनाम।

श्रीदेव्युवाच ॥ वददेवमहादेव सर्व्वशास्त्रविदाँव्वर ॥ कृपा ङ्करुजगन्नाथ कथयस्वममप्रभो ॥ प्रचण्डचण्डिकादेवी सर्व्व लोकहितैषिणी ॥ तस्याश्चकथितंसर्व्वंस्तवञ्चकवचादिकम् ॥

इदानीञ्छिन्नमस्तायाः नाम्नांसाहस्रकंशुभम् ॥ मेप्रकाशयदेवेश कृपयाभक्तवत्सल ॥ शिवउवाच ॥ शृणुदेविप्रवक्ष्यामिच्छिन्ना यास्सुमनोहरम् ॥ गोपनीयम्प्रयत्नेनयदीच्छेदात्मनोहितम् ॥ नवक्तव्यञ्चकुत्रापि प्राणैःकण्ठगतैरपि ॥ तच्छृणुष्वमहेशानिसर्व न्तत्कथयामिते ॥ विनापूजाँव्विनाध्यानँव्विनाजाप्येनासिद्धय ति॥विनाध्यानन्तथादेविविनाभूतादिशोधनम् ॥पठनादेवसिद्धिः स्यात्सत्यंसत्यम्वरानने ॥ पुराकैलासशिखरेसर्व्वदेवसभालये॥ परिपप्रच्छकथितंयथाशृणुवरानने ॥ अस्यश्रीप्रचण्डचण्डिका सहस्रनामस्तोत्रस्यभैरवऋषिःसम्राट्छन्दःप्रचण्डचण्डिकादेव ता धर्म्मार्थकाममोक्षार्थे जपेविनियोगः ॥ प्रचण्डचण्डिकाच ण्डाचण्डदेव्यविनाशिनी ॥ चामुण्डाचसुचण्डाच चपलाचारु देहिनी ॥ ललज्जिह्वाचलद्रक्ताचारुचन्द्रनिभानना ॥ चकोरा क्षीचण्डनादाचञ्चलाचमनोन्मदा ॥ चेतनाचितिसंस्थाचचित्क लाज्ञानरूपिणी ॥ महाभयङ्करीदेवीवरदाभयधारिणी ॥ भया ढ्याभयरूपाच भयबन्धविमोचिनी ॥ भवानीभुवनेशीचभवसं सारतारिणी॥ भवाब्धिर्ब्भवमोक्षाच भवबन्धविघातिनी ॥भागी रथी भगस्थाचभाग्यभोग्यप्रदायिनी॥ कमलाकामदादुर्ग्गादुर्ग्ग बन्धविमोचिनी ॥ दुर्दर्शनादुर्ग्गरूपा दुर्ज्ञेयादुर्ग्गनाशिनी ॥ दीनदुःखहरानित्यानित्यशोकविनाशिनी ॥ नित्यानन्दमयीदे वी नित्यङ्कल्याणकारिणी ॥ सर्व्वार्त्थसाधनकरीसर्व्वसिद्धिस्वरू पिणी ॥ सर्व्वक्षोभनशक्तिश्चसर्व्वविद्राविणीपरा ॥ सर्व्वरञ्जन शक्तिश्चसर्व्वोन्मादस्वरूपिणी ॥ सर्व्वज्ञासिद्धिदात्रीचसिद्धिवि द्यास्वरूपिणी ॥ सकलानिष्कलासिद्धाकलातीताकलामयी ॥ कुलज्ञाकुलरूपाचचक्षुरानन्ददायिनी ॥ कुलीनासामरूपाच कामरूपामनोहरा ॥ कमलस्थाकञ्जमुखीकुञ्जरेश्वरगामिनी ॥

कुलरूपाकोटराक्षीकमलैश्वर्य्यदायिनी ॥ कुन्तीककुब्जिनीकुल्ला कुरुकुल्लाकरालिका ॥ कामेश्वरीकाममाता कामतापविमोचिनी ॥ कामरूपाकामसत्त्वाकामकौतुककारिणी ॥ कारुण्यहृदयाक्रींक्रींमन्त्ररूपाच कोटरा ॥ कौमोदकीकुमुदिनीकैवल्याकुलवासिनी ॥ केशवीकेशवाराध्याकेशीदैत्यनिषूदिनी ॥ क्लेशहाक्लेशरहिताक्लेशसङ्घविनाशिनी ॥ करालीचकरालास्याकराला सुरनाशिनी ॥ करालचर्म्मासिधरा करालकुलनाशिनी ॥ कङ्किनीकङ्कनिरताकपालवरधारिणी ॥ खड्गहस्तात्रिनेत्राच खण्ड मुण्डासिधारिणी ॥ खलहाखलहन्त्रीच क्षरतीखगतीसदा ॥ गङ्गागौतमपूज्याचगौरीगन्धर्व्ववासिनी ॥ गन्धर्व्वागगणाराध्या गणागन्धर्व्वसेविता ॥ गणत्कारगणादेवीनिर्गुणाचगुणात्मिका ॥ गुणतागुणदात्रीचगुणगौरवदायिनी ॥ गणेशमातागम्भीराग गणाज्योतिकारिणी॥ गौराङ्गीचगयागम्यागौतमस्थानवासिनी ॥ गदाधरप्रियाज्ञेया ज्ञानगम्याग्रहेश्वरी ॥ गायत्रीचगुणवती गुणातीतागुणेश्वरी ॥ गणेशजननीदेवीगणेशवरदायिनी ॥ गणाध्यक्षनुतानित्यागणाध्यक्षप्रपूजिता ॥ गिरीशरमणीदेवी गिरीशपरिवन्दिता ॥ गतिदागतिहागीता गौतमीगुरुसेविता ॥ गुरुपूज्यागुरुयुतागुरुसेवनतत्परा ॥ गन्धद्वाराचगन्धाढ्या गन्धात्मागन्धकारिणी ॥ गीर्व्वाणपतिसम्पूज्यागीर्व्वाणपतितुष्टिदा ॥ गीर्व्वाणाधीशरमणीगीर्व्वाणाधीशवन्दिता ॥ गीर्व्वाणाधीशसंसेव्यागीर्व्वाणाधीशहर्ष्वदा ॥ गानशक्तिर्ग्गानगम्यागानशक्तिप्रदायिनी ॥ गानविद्यागानसिद्धागानसन्तुष्टमानसा ॥ गानातीतागानगीतागानहर्ष्वप्रपूरिता ॥ गन्धर्व्वपतिसंदृष्टागन्धर्व्वगुणमण्डिता ॥ गन्धर्व्वगणसंसेव्यागन्धर्व्वगणमध्यगा।गन्धर्व्वगणकुशलागन्धर्व्वगणपूजिता॥गन्धर्व्वगण

निरतागन्धर्व्वगणभूषिता ॥ घर्घरीघोररूपाचघोरघुर्घुरनादिनी ॥ घर्म्मबिन्दुसमुद्भूताघर्म्मबिन्दुस्वरूपिणी ॥ घण्टारवाघनरवा घनरूपाघनोदरी॥ घोरसत्त्वाचघनदाघण्टानादविनोदिनी ॥घोरचाण्डालिनीघोराघोरचण्डविनाशिनी ॥ घोरदानवदमनीघोरदानवनाशिनी ॥ घोरकर्म्मादिरहिताघोरकर्म्मनिषेविता ॥ घोरतत्त्वमयीदेवीघोरतत्त्वविमोचिनी ॥ घोरकर्म्मादिरहिताघोरकर्म्मादिपूरिता ॥ घोरकर्म्मादिनिरताघोरकर्म्मप्रवर्द्धिनी ॥ घोरभूतप्रमथनीघोरवेतालनाशिनी ॥ घोरदावाग्निदमनीघोरशत्रुनिषूदिनी ॥ घोरमन्त्रयुताचैवघोरमन्त्रप्रपूजिता ॥ घोरमन्त्रमनोऽभिज्ञाघोरमन्त्रफलप्रदा ॥ घोरमन्त्रनिधिश्चैवघोरमन्त्रकृतास्पदा ॥ घोरमन्त्रेश्वरीदेवीघोरमन्त्रार्थमानसा॥घोरमन्त्रार्थतत्त्वज्ञाघोरमन्त्रार्थपारगा ॥ घोरमन्त्रार्थविभवाघोरमन्त्रार्थबोधिनी॥घोरमन्त्रार्थनिचयाघोरमन्त्रार्थजन्मभूः ॥घोरमन्त्रजपरताघोरमन्त्रजपोद्यता ॥ ङकारवर्ण्णनिलयाङकाराक्षरमण्डिता ॥ ङकारापररूपाचङकाराक्षररूपिणी ॥ चित्ररूपाचित्रनाडीचारुकेशीचयप्रभा ॥ चञ्चलाचञ्चलाकाराचारुरूपाचचण्डिका॥ चतुर्व्वेदमयीचण्डाचाण्डालगणमण्डिता ॥ चाण्डालच्छेदिनीचण्डतपानिर्म्मूलकारिणी ॥ चतुर्भुजाचण्डरूपाचण्डमुण्डविनाशिनी ॥ चन्द्रिकाचन्द्रकीर्तिश्च चन्द्रकान्तिस्तथैवच ॥ चन्द्रास्याचन्द्ररूपाचचन्द्रमौलिस्वरूपिणी ॥ चन्द्रमौलिप्रियाचन्द्रमौलिसन्तुष्टमानसा ॥ चकोरबन्धुरमणीचकोरबन्धुपूजिता॥ चक्ररूपाचक्रमयीचक्राकारस्वरूपिणी॥चक्रपाणिप्रियाचक्रपाणिप्रीतिप्रदायिनी॥चक्रपाणिरसाभिज्ञाचक्रपाणिवरप्रदा ॥ चक्रपाणिवरोन्मत्ताचक्रपाणिस्वरूपिणी ॥ चक्रपाणीश्वरीनित्यंचक्रपाणिनमस्कृता ॥चक्रपाणिसमुद्भूताचक्रपाणिगुणास्पदा॥ चन्द्राव

लीचन्द्रवतीचन्द्रकोटिसमप्रभा ॥ चन्दनार्च्चितपादाब्जाचन्दना न्वितमस्तका ॥ चारुकीर्त्तिश्चारुनेत्राचारुचन्द्रविभूषणा ॥चारुभू षाचारुवेषाचारुवेषप्रदायिनी ॥ चारुभूषाभूषिताङ्गीचतुर्व्व क्त्रवरप्रदा ॥ चतुर्व्वक्त्रसमाराध्याचतुर्व्वक्त्रसमाश्रिता ॥ चतुर्व्व क्त्राचतुर्व्वाहाचतुर्त्थीचचतुर्द्दशी ॥ चित्राचर्मण्वतीचैत्रीचन्द्रभा गाचचम्पका ॥ चतुर्द्दशयमाकाराचतुर्द्दशयमानुगा ॥ चतुर्द्दशय मप्रीताचतुर्द्दशयमप्रिया ॥ छलस्थाछिद्ररूपाचच्छद्मदाछद्मरा जिका ॥ छिन्नमस्तातथाछिन्नाछिन्नमुण्डविधारिणी । जयदाज यरूपाचजयन्तीजयमोहिनी ॥ जयाजीवनसंस्थाचजालन्धरनि वासिनी ॥ ज्वालामुखीज्वालदात्रीजाज्वल्यदहनोपमा ॥ जग द्वन्द्याजगत्पूज्याजगत्राणपरायणा ॥ जगतीजगदाधाराजन्ममृ त्युजरापहा ॥ जननीजन्मभूमिश्चजन्मदाजयशालिनी ॥ ज्वर रोगहराज्वालाज्वालामालाप्रपूरिता ॥ जम्भारातीश्वरीजम्भा रातिवैभवकारिणी ॥ जम्भारातिस्तुताजम्भारातिशत्रुनिषूदिनी जयदुर्ग्गाजयाराध्याजयकालीजयेश्वरी ॥ जयताराजयातीता जयशङ्करवल्लभा ॥ जलदाजहुतनयाजलधित्रासकारिणी ॥ जल धिव्याधिदमनीजलधिज्वरनाशिनी ॥ जङ्घमेशीजाड्यहराजा ड्यसङ्घनिवारिणी ॥ जाड्यग्रस्तजनातीताजाड्यरोगनिवारि णी ॥ जन्मदात्रीजन्महर्त्रीजयघोषसमन्विता ॥ जपयोगसमायु क्ताजपयोगविनोदिनी ॥ जपयोगप्रियाजाप्याजपातीताजयस्व ना ॥ जायाभावस्थिताजायाजायाभावप्रपूरिणी ॥ जपाकुसुमस ङ्काशाजपाकुसुमपूजिता ॥ जपाकुसुमसम्प्रीताजपाकुसुममण्डि ता ॥ जपाकुसुमवद्भासाजपाकुसुमरूपिणी ॥ जमदग्निस्वरूपाच जानकीजनकात्मजा ॥ झञ्झावातप्रमुक्ताङ्गीझोरझङ्कारवासि नी ॥ झङ्कारकारिणीझञ्झावातरूपाचझङ्करी ॥ ञकाराणुस्वरू

पाचटवट्टङ्कारनादिनी ॥ टङ्कारीटङ्कवाणीचठकाराक्षररूपिणी ॥ डिण्डिमाचतथाडिम्भाडिण्डुडिण्डिमनादिनी ॥ ढक्कामयीढिलमयीनृत्यशब्दाविलासिनी ॥ ढक्काढक्केश्वरीढक्काशब्दरूपातथैव च ॥ढक्कानादप्रियाढक्कानादसन्तुष्टमानसा ॥ णकाराणाक्षरमयीणाक्षरादिस्वरूपिणी ॥ त्रिपुरात्रिपुरमयीत्रिशक्तिस्त्रिगुणात्मिका ॥ तामसीचत्रिलोकेशीत्रिपुराचत्रयीश्वरी ॥ त्रिविद्याचत्रिरूपाचत्रिनेत्राचत्रिरूपिणी ॥ तारिणीतरलातारातारकारिप्रपूजिता ॥ तारकारिसमाराध्यातारकारिवरप्रदा ॥ तारकारिप्रसूस्तर्न्वीतरुणीतरलप्रभा ॥ त्रिरूपाचत्रिपुरगात्रिशूलवरधारिणी ॥ त्रिशूलिनीतन्त्रमयीतन्त्रशास्त्रविशारदा ॥ तन्त्ररूपातपोमूर्तिस्तन्त्रमन्त्रस्वरूपिणी ॥ तडित्तडिल्लताकारातत्त्वज्ञानप्रदायिनी ॥ तत्त्वज्ञानेश्वरीदेवीतत्त्वज्ञानप्रमोदिनी ॥ त्रयीमयीत्रयीसेव्याऽव्यक्षरीऽव्यक्षरेश्वरी ॥ तापविध्वंसिनीतापसङ्घनिर्म्मूलकारिणी ॥ त्रासकर्त्रीत्रासहर्त्रीत्रासदात्रीचत्रासहा ॥ तिथीशातिथिरूपाचतिथिस्थातिथिपूजिता ॥ तिलोत्तमाचतिलदातिलप्रीतातिलेश्वरी ॥ त्रिगुणात्रिगुणाकारात्रिपुरीत्रिपुरात्मिका॥ त्रिकुटात्रिकुटाकारात्रिकुटाचलमध्यगा ॥ त्रिजटाचत्रिनेत्राचत्रिनेत्रवरसुन्दरी ॥ तृतीयाचत्रिवर्षाचत्रिविधात्रिमतेश्वरी ॥ त्रिकोणस्थात्रिकोणेशीत्रिकोणयन्त्रमध्यगा ॥ त्रिसन्ध्याचत्रिसन्ध्यार्च्याऽत्रिपदात्रिपदास्पदा ॥ स्थानस्थितास्थलस्थाचधन्यस्थलनिवासिनी ॥ थकाराक्षररूपाचस्थूलरूपातथैवच ॥ स्थूलहस्तातथास्थूलास्थैर्य्यरूपप्रकाशिनी ॥ दुर्ग्गादुर्ग्गार्त्तिहन्त्रीचदुर्ग्गवन्धविमोचिनी ॥ देवीदानवसंहन्त्रीदनुजेशनिषूदिनी ॥ दारापत्यप्रदानित्याशङ्करार्द्धाङ्गधारिणी ॥ दिव्याङ्गीदेवमाताचदेवदुष्टविनाशिनी ॥ दीनदुःखहरादीनतापनिर्म्मूलका

रिणी ॥ दीनमातादीनसेव्यादीनदम्भविनाशिनी ॥ दनुजध्वं सिनीदेवीदेवकीदेववल्लभा ॥ दानवारिप्रियादीर्घादानवारिप्रपू जिता ॥दीर्घस्वरादीर्घतनुर्दीर्घदुर्गतिनाशिनी ॥ दीर्घनेत्रा दीर्घचक्षुर्दीर्घकेशीदिगम्बरी ॥ दिगम्बरप्रियादान्तादिगम्बर स्वरूपिणी॥दुःखहीनादुःखहरादुःखसागरतारिणी॥ दुःखदा रिद्र्यशमनीदुःखदारिद्र्यकारिणी ॥ दुःखदादुस्सहादुष्टखण्डनेक स्वरूपिणी ॥ देववामादेवसेव्यादेवशक्तिप्रदायिनी ॥ दामिनी दामिनीप्रीतादामिनीशतसुन्दरी ॥ दामिनीशतसंसेव्यादामि नीदामभूषिता ॥ देवताभावसन्तुष्टादेवताशतमध्यगा ॥ दया द्रर्चदयारूपादयादानपरायणा ॥ दयाशीलादयासारादयासा गरसंस्थिता ॥ दशविद्यात्मिकादेवीदशविद्यास्वरूपिणी ॥ ध रणीधनदाधात्रीधन्याधान्यपराशिवा ॥ धर्म्मरूपाधनिष्ठाचधै र्याचधीरगोचरा ॥ धर्म्मराजेश्वरीधर्म्मकर्म्मरूपाधनेश्वरी ॥ धनुर्व्विद्याधनुर्गम्याधनुर्द्धरवरप्रदा ॥ धर्म्मशीलाधर्म्मलीलाध र्म्मकर्म्मविवर्जिता ॥ धर्म्मदाधर्म्मनिरताधर्म्मपाखण्डखण्डि नी ॥ धर्म्मेशीधर्म्मरूपाचधर्म्मराजवरप्रदा ॥ धर्म्मिणीधर्म्मगे हस्थाधर्म्माधर्म्मस्वरूपिणी ॥ धनदाधनदप्रीताधनधान्यसमृ द्धिदा ॥ धनधान्यसमृद्धिस्थाधनधान्यविनाशिनी ॥ धर्म्मनि ष्ठाधर्म्मधीराधर्म्ममार्ग्गरतासदा ॥ धर्म्मबीजकृतस्थानाधर्म्म बीजसुरक्षिणी ॥ धर्म्मबीजेश्वरीधर्म्मबीजरूपाचधर्म्मगा ॥ धर्म्म बीजसमुद्भूताधर्म्मबीजसमाश्रिता ॥ धराधरप्रतिप्राणधराधरप तिस्तुता ॥ धराधरेन्द्रतनुजाधराधरेन्द्रवन्दिता ॥ धराधरेन्द्रगेह स्थाधराधरेन्द्रपालिनी ॥ धराधरेन्द्रसर्व्वार्त्तिनाशिनीधर्म्मपा लिनी ॥ नवीनानिर्म्मलानित्यानगराजप्रपूजिता॥ नागेश्वरीनाग मातानागकन्याचनग्निका॥ निर्ल्लेपानिर्व्विकल्पाच निर्ल्लोमानिरु

पद्मवा॥ निराहारानिराकारानिरञ्जनस्वरूपिणी॥ नागिनीनागवि
भवानागराजपरिस्तुता॥ नागराजगुणज्ञाच नागराजसुखप्रदा॥
नागलोकगतानित्यंनागलोकनिवासिनी॥ नागलोकेश्वरीनाग
भगिनीनागपूजिता॥ नागमध्यस्थितानागमोहसङ्क्षोभदायि
नी॥ नृत्यप्रियानृत्यवती नृत्यगीतपरायणा॥ नृत्येश्वरीनर्त्तकी
च नृत्यरूपानिराश्रया॥ नारायणीनरेन्द्रस्थानरमुण्डास्थिमा
लिनी॥ नरमांसप्रियानित्यानररक्तप्रियासदा॥ नरराजेश्वरी
नारीरूपानारीस्वरूपिणी॥ नारीगणार्च्चितानारीमध्यगानूत
नाम्बरा॥ नर्म्मदाचनदीरूपा नदीसङ्गमसंस्थिता॥ नर्म्मदेश्व
रसम्प्रीतानर्म्मदेश्वररूपिणी॥ पद्मावतीपद्ममुखीपद्मकिञ्ज
ल्कवासिनी॥ पट्टवस्त्रपरीधाना पद्मरागविभूषिता॥ परमाप्रीति
दानित्याप्रेतासननिवासिनी॥ परिपूर्णरसोन्मत्ताप्रेमविह्वलवल्ल
भा॥ पवित्राशवनिःपूताप्रेयसीपरमात्मिका॥ प्रियव्रतपरानि
त्यापरमप्रेमदायिनी॥पुष्पप्रियापद्मकोशा पद्मधर्म्मनिवासिनी॥
फेत्कारिणीतन्त्ररूपा फेरुफेरवनादिनी॥ वंशिनीवेशरूपाचवग
लाकामरूपिणी॥वाङ्मयीवसुधाधृष्यावाग्भवाख्यावरानरा॥ बु
द्धिदाबुद्धिरूपाचविद्यावादस्वरूपिणी॥ बालावृद्धमयीरूपावा
णीवाक्यनिवासिनी॥ वरुणावाग्वतीवीरावीरभूषणभूषिता॥ वी
रभद्रार्च्चितपदावीरभद्रप्रसूरपि॥ वेदमार्ग्गरतावेदमन्त्ररूपावषट्
प्रिया॥ वीणावाद्यसमायुक्तावीणावाद्यपरायणा॥ वीणारवातथा
वीणाशब्दरूपाचवैष्णवी॥ वैष्णवाचारनिरतावैष्णवाचारतत्प
रा॥ विष्णुसेव्याविष्णुपत्नी विष्णुरूपावरानना॥ विश्वेश्वरी
विश्वमाताविश्वनिर्म्माणकारिणी॥ विश्वरूपाचविश्वेशीवि
श्वसंहारकारिणी॥ भैरवीभैरवाराध्या भूतभैरवसेविता॥ भै
रवेशीतथाभीमाभैरवेश्वरतुष्टिदा॥ भैरवाधीशरमणी भैरवाधी

शपालिनी ॥ भीमेश्वरीभीममाताभीमशब्दपरायणा ॥ भीम रूपाचभीमेशीभीमाभीमवरप्रदा ॥ भीमपूजितपादाब्जाभीमभैर वपालिनी ॥ भीमासुरध्वंसकरीभीमदुष्टविनाशिनी ॥ भुवनाभु वनाराध्याभवानीभूतिदासदा ॥ भयदाभयहन्त्रीच अभयाभय रूपिणी ॥ भीमनादाविह्वलाचभयभीतिविनाशिनी ॥ मत्ताप्रम त्तरूपाच मदोन्मत्तस्वरूपिणी ॥ मान्यामनोज्ञामानाच मङ्गला चमनोहरा ॥ माननीयामहापूज्यामहिषीदुष्टमर्द्दिनी ॥ महिषा सुरहन्त्रीचमातङ्गीमयवासिनी ॥ माध्वीमधुमयीमुद्रामुद्रिकाम न्त्ररूपिणी ॥ महाविश्वेश्वरीदूती मौलिचन्द्रप्रकाशिनी ॥ यशः स्वरूपिणीदेवी योगमार्ग्गप्रदायिनी ॥ योगिनीयोगगम्याच याम्येशीयोगरूपिणी ॥ यज्ञाङ्गीचयोगमयी जपरूपाजपा त्मिका ॥ युगाख्याचयुगान्ताचयोनिमण्डलवासिनी ॥ अयो निजायोगनिद्रायोगानन्दप्रदायिनी ॥ रमारतिप्रियानित्यार तिरागविवर्द्धिनी ॥ रमणीरासस्सम्भूतारम्यारासप्रियारसा ॥ र णोत्कण्ठारणस्थाच वरारङ्गप्रदायिनी ॥ रेवतीरणजैत्रीचरसोद्भू तारणोत्सवा ॥ लतालावण्यरूपाच लवणाब्धिस्वरूपिणी ॥ ल वङ्गकुसुमाराध्यालोलजिह्वाचलेलिहा ॥ वशिनीवनसंस्थाचव नपुष्पप्रियावरा ॥ प्राणेश्वरीबुद्धिरूपाबुद्धिदात्रीबुधात्मिका ॥ शमनीश्वेतवर्ण्णाचशाङ्करीशिवभाषिणी ॥ शाम्यरूपाशक्तिरू पा शक्तिबिन्दुनिवासिनी ॥ सर्व्वेश्वरीसर्व्वदात्री सर्व्वमाताच शर्व्वरी ॥ शाम्भवीसिद्धिदासिद्धा सुषुम्नास्वरभासिनी ॥ सहस्र दलमध्यस्थासहस्रदलवर्त्तिनी ॥ हरप्रियाहरध्येयाहूङ्कारबीज रूपिणी ॥ लङ्केश्वरीचतरलालोममांसप्रपूजिता ॥ क्षेम्याक्षेमक रीक्षामाक्षीरविन्दुस्वरूपिणी ॥ क्षिप्तचित्तप्रदानित्याक्षौमवस्त्र विलासिनी ॥ छिन्नाचछिन्नरूपाच क्षुधाक्षौत्काररूपिणी ॥ स

र्व्ववर्ण्णमयीदेवी सर्व्वसम्पत्प्रदायिनी ॥ सर्व्वसम्पत्प्रदात्रीचस म्पदापदभूषिता ॥ सत्त्वरूपाचसर्व्वार्त्था सर्व्वदेवप्रपूजिता ॥ स र्व्वेश्वरीसर्व्वमाता सर्व्वज्ञासुरसात्मिका ॥ सिन्धुर्म्मन्दाकिनी गङ्गानदीसागररूपिणी ॥ सुकेशीमुक्तकेशीचडाकिनीवरवर्ण्णि नी ॥ ज्ञानदाज्ञानगगनासोममण्डलवासिनी ॥ आकाशानि लयानित्या परमाकाशरूपिणी ॥ अन्नपूर्ण्णामहानित्या महा देवरसोद्भवा ॥ मङ्गलाकालिकाचण्डा चण्डनादातिभीषणा ॥ चण्डासुरस्यमथिनी चामुण्डाचपलात्मिका ॥ चण्डीचामर केशीच चलत्कुण्डलधारिणी ॥ मुण्डमालाधरानित्या खण्ड मुण्डविलासिनी ॥ खड्गहस्तामुण्डहस्तावरहस्तावरप्रदा ॥ असिचर्म्मधरानित्या पाशाङ्कुशवरापरा ॥ शूलहस्ताशिवह स्ता घण्टानादविलासिनी ॥ धनुर्ब्बाणधरादित्या नागहस्तान गात्मजा ॥ महिषासुरहन्त्री च रक्तबीजविनाशिनी ॥ रक्तरूपा रक्तगात्रा रक्तहस्ताभयप्रदा ॥ असिताचधर्म्मधरा पाशाङ्कु शधरापरा ॥ धनुर्ब्बाणधरानित्या धूम्रलोचननाशिनी ॥ पर स्थादेवतामूर्तिः शर्व्वाणीशारदापरा ॥ नानावर्ण्णविभूषाङ्गीना नारागसमापिनी ॥ पशुवस्त्रपरीधानापुष्पायुधधरापरा ॥ मुक्त रञ्जितमालाढ्या मुक्ताहारविलासिनी ॥ स्वर्ण्णकुण्डलभूषाच स्वर्ण्णसिंहासनस्थिता ॥सुन्दराङ्गीसुवर्ण्णाभाशाम्भवीशकटात्मि का ॥ सर्व्वलोकेशविद्याचमोहसम्मोहकारिणी ॥ श्रेयसीसृष्टि रूपाच च्छिन्नच्छन्नमयीच्छला ॥ छिन्नमुण्डधरानित्यानित्यानन्द विधायिनी ॥ नन्दापूर्ण्णाचरिक्ताचतिथयः पूर्ण्णषोडशी ॥कुहूःस क्रान्तिरूपाच पञ्चपर्व्वविलासिनी ॥ पञ्चबाणधरानित्यापञ्च मप्रीतिदापरा ॥ पञ्चपत्रमभीलाषापञ्चामृतविलासिनी ॥ पा ञ्चालीपञ्चमीदेवी पञ्चरक्तप्रसारिणी ॥ पञ्चबाणधरानित्यानि

त्यदात्रीदयापरा ॥ पललादिप्रियानित्या पशुगम्यापरेशिता ॥ परापररहस्याच परमप्रेमविह्वला ॥ कुलीनाकेशिमार्ग्गस्थाकुलमार्ग्गप्रकाशिनी ॥ कुलाकुलस्वरूपाच कुलार्णवमयीकुला ॥ रुक्माचकालरूपाच कालकम्पनकारिणी ॥ विलासरूपिणीभद्राकुलाकुलनमस्कृता ॥ कुवेरवित्तधात्रीचकुमार्ग्गजननीपरा ॥ कुमारीरूपसंस्थाचकुमारीपूजनाम्विका ॥ कुरङ्गनयनादेवीदिने शास्यापराजिता ॥ कुण्डलीकदलीसेनाकुमार्ग्गरहितावरा ॥ अनन्तरूपानन्तस्थाआनन्दसिन्धुवासिनी ॥ ईलास्वरूपिणीदेवी ईईभेदभयङ्करी ॥ इङ्गलापिङ्गलानाडीइकाराक्षररूपिणी ॥ उमाउत्पत्तिरूपाचउच्चभावविनाशिनी ॥ ऋग्वेदाचनिराराध्या यजुर्व्वेदप्रपूजिता ॥ सामवेदेनसङ्गीता अथर्व्ववेदभाषिणी ॥ ऋकाररूपिणीऋक्षा निरक्षरस्वरूपिणी ॥ अहिदुर्ग्गासमाचाराइकारार्ण्णस्वरूपिणी॥ ओङ्काराप्रणवस्थाच ओङ्कारादिस्वरूपिणी॥ अनुलोमविलोमस्थाथकारवर्ण्णसम्भवा॥पञ्चाशद्वर्ण्णबीजाढ्या पञ्चाशन्मुण्डमालिका ॥ प्रत्येकादशसङ्ख्याचषोडशीछिन्नमस्तका ॥ षडङ्गयुवतीपूज्या षडङ्गरूपवर्जिता ॥ षट्चक्रसंश्रिता नित्याविश्वेशीषट्दलया ॥ मालामन्त्रमयीमन्त्रजपमातामदालसा ॥ सर्व्वविश्वेश्वरीशक्तिः सर्व्वानन्दप्रदायिनी ॥ इति श्रीछिन्नमस्तायाःसहस्रनाममुत्तमम् ॥ पूजाक्रमेणकथितंसाधकानांसुखावहम् ॥ गोपनीयङ्गोपनीयङ्गोपनीयंनसंशयः ॥ अर्द्धरात्रेमुक्तकेशो भक्तियुक्तोभवेन्नरः ॥ जपित्वापूजयित्वाच पठेन्नामसहस्रकम् ॥ विद्यासिद्धिर्भवेत्तस्यषण्मासाभ्यासयोगतः । येनकेनप्रकारेणदेवीभक्तिपरोभवेत् ॥ अखिलांस्तम्भयेल्लोकान्राजानमपिमोहयेत् ॥ आकर्ष्षयेद्देवशक्तिम्मारयेद्देविविद्विषम् ॥ शत्रवोदासताय्यैन्तिपापानियान्तिसङ्क्षयम् ॥ मृत्यु

श्वक्षयताय्यँयाति पठनाद्भाषणात्प्रिये ॥ प्रशस्तायाऽप्रसादेन किन्नसिद्धचतिभूतले ॥ इदंरहस्यम्परमम्परंस्वस्त्ययनम्महत् ॥ धृत्वाबाहौमहासिद्धिः प्राप्यतेनात्रसंशयः ॥ अनयासदृशीविद्यानविद्येतमहेश्वरि ॥ वारमेकन्तुयोऽधीतेसर्व्वसिद्धीश्वरोभवेत् ॥ कुलवारेकुलाष्टम्याङ्कुहूसङ्क्रान्तिपूर्णिमा ॥ यश्चेमाम्पठते विद्यान्तस्यसम्यक्फलंशृणु ॥ अष्टोत्तरशतञ्जत्वा पठेन्नामसहस्रकम् ॥ भक्त्यास्तुत्वामहादेवींसर्व्वपापात्प्रमुच्यते ॥ सर्व्वपापैर्व्विनिर्म्मुक्तः सर्व्वसिद्धीश्वरोभवेत् ॥ अष्टम्याञ्चैवानिशीथेचचतुष्पथगतोनरः ॥ माषभक्तबलिन्दत्वा पठेन्नामसहस्रकम् ॥ सुदश्शंवामवेद्यान्तु मासत्रयविधानतः ॥ दुर्ज्जयऽकामरूपश्चमहाबलपराक्रमः ॥ कुमारीपूजनन्नाममन्त्रमात्रम्पठेन्नरः ॥ एतन्मन्त्रस्यपठनात्सर्व्वसिद्धीश्वरोभवेत् ॥ इतितेकथितन्देविसर्व्वसिद्धिपरन्नरः ॥ जत्वास्तुत्वामहादेवींसर्व्वपापैऽप्रमुच्यते ॥ न प्रकाश्यमिदन्देवि सर्व्वदेवनमस्कृतम् ॥ इदंरहस्यम्परमङ्गोपव्यम्पशुसङ्कटे॥ इतिसकलविभूतिर्हेतुभूतम्प्रशस्तम्पठतियइहमर्त्त्यश्छिन्नमस्तास्तवञ्च ॥ धनदइवधनाढ्योमाननीयोनृपाणांसभवतिचजनानामाश्रयः सिद्धिवेत्ता ॥ इतिश्रीविश्वसारतन्त्रेशिवपार्व्वतीसव्वँवादे श्रीछिन्नमस्तासहस्रनामस्तोत्रं सम्पूर्णम् ॥

इति शाक्तप्रमोदे छिन्नमस्तातन्त्रं समाप्तम् ।